# Shri Kashi Vishvanatha Stutih

# શ્રીકાશીવિશ્વનાથસ્તુતિઃ

## Document Information

Text title : Kashi Vishvanatha Stutih

File name : kAshIvishvanAthastutiH.itx

Category : shiva

Location : doc_shiva

Author : SwAmi Maheshvarananda Sarasvati

Transliterated by : Akash Pandeya

Proofread by : Akash Pandeya

Latest update : December 31, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 1, 2022

*sanskritdocuments.org*

Shri Kashi Vishvanatha Stutih

# શ્રીકાશીવિશ્વનાથસ્તુતિઃ

દુર્ગાધીશો દ્રુતિજ્ઞો દ્રુતિનુતિવિષયો દૂરદૃષ્ટિર્દુરીશો
    દિવ્યાદિવ્યૈકરાધ્યો દ્રુતિચરવિષયો દૂરવીક્ષો દરિદ્રઃ ।
દેવૈઃ સદ્ગીર્તનીયો દલિતદલદયાદાનદીક્ષૈકનિષ્ઠો
    દાની દીનાર્તિહારી ભવદવદહનો દીયતાં દૃષ્ટિવૃષ્ટિઃ ॥ ૧॥

ક્ષેત્રજ્ઞઃ ક્ષેત્રનિષ્ઠઃ ક્ષયકલિતકલઃ ક્ષાત્રવર્ગૈકસેવ્યઃ
    ક્ષેત્રાધીશોઽક્ષરાત્મા ક્ષિતિપ્રથિકરણઃ ક્ષાલિતઃ ક્ષેત્રદૃશ્યઃ ।
ક્ષોણ્યા ક્ષીણોઽક્ષરજ્ઞો ક્ષરપૃથુકલિતઃ ક્ષીણવીણૈકગેયઃ
    ક્ષૌરઃ ક્ષોણીધ્રવર્ણ્યઃ ક્ષયતુ મમ બલક્ષીણતાં સક્ષણં સઃ ॥ ૨॥

ક્રૂરઃ ક્રૂરૈકકર્મા કલિતકલકલૈઃ કીર્તનીયઃ કૃતિજ્ઞઃ
    કાલઃ કાલૈકકાલો વિકલિતકર્ણઃ કારણાક્રાન્તકીર્તિઃ ।
કોપઃ કોપેઽપ્યકુપ્યન્ કુપિતકરકરાઘાતકીલઃ કૃતાન્તઃ
    કાલવ્યાલાલિમાલઃ કલયતુ કુશલં વઃ કરાલઃ કૃપાલુઃ ॥ ૩॥

ગૌરી સ્નિહ્યતુ મોદતાં ગણપતિઃ શુણ્ડામૃતં વર્ષતાદ્
    નન્દીશઃ શુભવૃષ્ટિમાવિતનુતાં શ્રીમાન્ ગણાધીશ્વરઃ ।
વાયુઃ સાન્દ્રસુખાવહઃ પ્રવહતાં દેવાઃ સમૃદ્ધાદયાઃ
    સમ્પૂર્તિં દધતાં સુખસ્ય નિતરાં વિશ્વેશ્વરઃ પ્રીયતામ્ ॥ ૪॥

શ્રીવિશ્વેશ્વરમન્દિરં પ્રવિલસેત્ સમ્પૂર્ણસિદ્ધં શુભં
    પુષ્ટં તુષ્ટસુખાકરં પ્રભવતાં સમ્મોદમોદાવહમ્ ।
એતદ્દર્શનકામના જગતિ સઞ્જાયેત સન્નિન્દતઃ
    સર્વેષાં ભગવાન્ મહેશ્વરકૃપાપૂર્ણો નિરીક્ષેત નઃ ॥ ૫॥

ઇતિ કાશીપીઠાધીશ્વરઃ શ્રીમહેશ્વરાનન્દઃ વિરચિતા
        શ્રીકાશીવિશ્વનાથસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by Akash Pandeya

*Shri Kashi Vishvanatha Stutih*

pdf was typeset on January 1, 2022

Please send corrections to *sanskrit@cheerful.com*